Shri Bhutanatha or Ayyappasvami SuprabhAtam

# श्रीभूतनाथ अथवा अय्यप्पस्वामिनः सुप्रभातम्

## Document Information

Text title : Bhutanathasuprabhatam

File name : bhUtanAthasuprabhAtam.itx

Category : deities_misc, ayyappa, suprabhAta

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : From Shastrarchana, Kannada publication

Latest update : July 10, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

# श्रीभूतनाथ अथवा अय्यप्पस्वामिनः सुप्रभातम्

श्रीगणेशाय नमः ।
श्रीकण्ठपुत्र हरिनन्दन विश्वमूर्ते
लोकैकनाथ करुणाकर चारुमूर्ते ।
श्रीकेशवात्मज सुमनोहर सत्यमूर्ते
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ १॥

श्रीविष्णुरुद्रसुत मङ्गळ कोमलाङ्ग
देवाधिदेव जगदीश सरोजनेत्र ।
कान्तारवास सुरमानववृन्दसेव्य
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ २॥

आशानुरूपफलदायक कान्तमूर्ते
ईशानकेशवसुत मणिकण्ठ सुदिव्यमूर्ते ।
भक्तेश भक्तहृदयस्थितभूमिपाल
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ३॥

सत्यस्वरूप सकलेश गुणार्णवेश
मर्त्यस्वरूप वरदेश रमेशसूनो ।
मुक्तिप्रद त्रिदशराज मुकुन्दसूनो
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ४॥

कालारिपुत्र महिषीमदनाशन श्री
कैलासवास शबरीश्वर धन्यमूर्ते ।
नीलाम्बराभरणशोभितसुन्दराङ्ग
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ५॥

नारायणात्मज परात्पर दिव्यरूप
वाराणसीशशिवनन्दन काव्यरूप ।
गौरीशपुत्र पुरुषोत्तम बालरूप

श्रीभूतनाथ, भगवान् तव सुप्रभातम् ॥ ६॥

त्रैलोक्यनाथ गिरिवास वनेनिवास
भूलोकवास भुवनाधिपदास देव ।
वेलायुधप्रियसहोदर शम्भुसूनो
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ७॥

आनन्दरूप करधारितचापबाण
ज्ञानस्वरूप, गुरुनाथ, जगन्निवास ।
ज्ञानप्रदायक जनार्दननन्दनेश
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ८॥

अम्भोजनाथसुत सुन्दर धन्यमूर्ते
शम्भुप्रियाकलितपुण्य पुराणमूर्ते ।
इन्द्रादिदेवगणवन्दित ब्रह्मचारिन्
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ९॥

देवेश देवगुणपूरित भाग्यमूर्ते
श्रीवासुदेवसुत पावन भक्तबन्धो ।
सर्वेश सर्वमनुजार्चित दिव्यमूर्ते
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ १०॥

नारायणात्मज सुरेश नरेश भक्त-
लोकेश केशवशिवात्मज भूतनाथ ।
श्रीनारदादि मुनिपुङ्गवपूजितेश
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ ११॥

आनन्दरूप सुरसुन्दरदेहधारिन्
शर्वात्मज शबरीश सुरालयेश । सुगरीश
नित्यात्मसौख्यवरदायक देवदेव
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ १२॥

सर्वेश सर्वमनुजार्जितसर्वपाप-
संहारकारक चिदात्मक रुद्रसूनो ।
सर्वेश सर्वगुणपूर्णकृपाम्बुराशे
श्रीभूतनाथ भगवन्, तव सुप्रभातम् ॥ १३॥

ओङ्काररूप जगदीश्वर भक्तबन्धो
पङ्केरुहाक्ष पुरुषोत्तम कर्मसाक्षिन् ।
माङ्गल्यरूप मणिकण्ठ मनोभिराम
श्रीभूतनाथ भगवन् तव सुप्रभातम् ॥ १४॥

इति श्रीभूतनाथ अथवा अय्यप्पस्वामिनः सुप्रभातम् ।

Proofread by PSA Easwaran

*Shri Bhutanatha or Ayyappasvami SuprabhAtam*
pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*